ॐ

# संस्कृतभारती-तेलङ्गाणा
# पत्रालयद्वारा संस्कृतम्
# Instructions List

समयः – घण्टात्रयम्
पूर्णाङ्काः – 100

**दिनम् - रविवासरः**
**रविवासरः २३-०२-२०२५**

---

Instruction

- Please Do not send your answer sheet through any email address. **Please send answer sheet through post only**
- We will issue an _Acknowledgement through our acknowledgement link (sbtelangana.in/ack) **and this link** will be activated on 04/03/2025. Before this time period please don't ask for any acknowledgement or confirmation.
- **Please send your answer script through post,courier or any other means to below given office address**
- **ANY Question is saying to answer in English or own language means that you can write your answer in any of these three language that is English,Hindi,Telugu**
- Please Post your answer script to this office address

  **Mobile:** 8332834852
  **Address:** Samskrita Bharati,Plot no. 176/1, Brahma Vidya Kuteer,
  Gurukulam lane,Secretariat (Sriramnagar)Colony,
  Puppalaguda, Manikonda;
  Hyderabad, Telangana State.
  Pincode-500089.
  Phone Number: 8332834852

**Important Note:**

- **Only answer sheet send through post will be forwarded for correction**
- **Wherever translation to sanskrit is written in question paper. It must be understood and must be translate in Devanagari Leepi**

# संस्कृतभारती तेलङ्गाणा
# पत्रालयद्वारा संस्कृतम् – शिक्षापरीक्षा – फरवरी -२०२५

समयः घण्टात्रयम् दिनाङ्कः २३-२-२०२५ पूर्णाङ्काः १०० क्रोधि माघ बहुल दशमी, भानुवासरः

---

**संस्कृतेन लेखनीयानि उत्तराणि देवनागरिलिप्या एव लेखनीयानि।**

**1.अ) एकस्य श्लोकस्य पदविभागम् अन्वयरचनां च कृत्वा तात्पर्यं स्वभाषया लिखत।** **(1x6=6)**

1.पश्येतां पाण्डुपुत्राणाम् आचार्य महतीं चमूम् । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥

2. एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥
उवाच पार्थं पश्यैतान् समवेतान् कुरूनिति ॥

**आ) सुभाषितद्वयस्य अन्वयार्थं तात्पर्यं च स्वभाषया लिखत।** **(2x4=8)**

3. एते सत्पुरुषाः परार्थघटकाः स्वार्थान् परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥

4. आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
विशुद्धमनसो नन्दन्ति योगीश्वराः ॥

5. करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयोः
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥

**2. अ) संस्कृतभाषया षण्णां प्रश्नानाम् उत्तराणि एकेन वाक्येन लिखत।** **(6x1=6)**

6. केन विना दैवं न सिद्ध्यति ?
7. विषममसिधाराव्रतं केषाम् ?
8. सौख्यं कुतः प्राणिनाम् ?
9. जगति भाग्यवानेव एतत् त्रयं प्राप्नोति। विवृणुत।
10.नाधः शिखा यान्ति कदाचिदेव । विवृणुत।
11. श्रीकृष्णः केन सन्तुष्टः जातः ?
12. इन्द्रः केन आराधनीयः? ततः किं भवति?

**आ) त्रयाणां सन्दर्भं वाक्यार्थं च स्वभाषया विवृणुत।** **(3x3=9)**

13. फलपर्यन्तं तपस्यामाचर ।
14. मूषकं गृहीतुं पर्वतस्य खननमिव ।
15. परपीडनं पापस्य कारणम् ।
16. त्वं तं शरणं गच्छ ॥
17. अतः इन्द्रियचापलं त्यज ।

**इ) अधो दत्तयोः एकस्य विवरणं दशवाक्यैः संस्कृतभाषया लिखत।** **(1x5=5)**

18. पाशुपतप्राप्त्यर्थम् अर्जुनेन प्रदर्शित तपोदीक्षां, वीरतां च विवृणुत।

19. धर्मराजस्य राजसूययागः।

**3. अ) प्रहेलिकाद्वयस्य उत्तरम् अर्थं च स्वभाषया लिखत।** **(2x2=4)**

20. राजन् कमलपत्राक्ष तत्ते भवतु चाक्षयम्।
आसादयति यद्रूपं करेणुः करणैः विना ॥

21. यजमानेन कः स्वर्गहेतुः सम्यग्विधीयते।
विहायाद्यन्तयोर्वर्णौ गोत्वं कुत्र स्थितं वद।

22. प्रायेण नीचलोकस्य कः करोतीह गर्वताम्।
आदौ वर्णद्वयं दत्त्वा ब्रूहि के वनवासिनः ॥

**आ) अधो दत्तेषु द्वौ न्यायौ स्वभाषया विवृणुत।** **(2x2=4)**

23. पिष्टपेषणन्यायः    24. बकबन्धप्रयासन्यायः    25. भिक्षुपादप्रसारन्यायः

**इ) द्वयोः सूक्तयोः तात्पर्यं स्वभाषया लिखत।** **(2x1=2)**

26. अप्रकटीकृतशक्तिः शक्तोऽपि जनस्तिरस्क्रियां लभते।

27. धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।

28. सत्यार्जवे धर्ममाहुः परं धर्मविदो जनाः।

**4. अ) एतेषां कृदन्तानाम् इतरवचनानि लिखत।** **(5x1=5)**

29. ---------------- ---------------- आरभमाणानाम्

30. -------------- -------------------- विक्रीणानाभ्यः

31. -------------- ------------------ नृत्यन्तीभिः

32. --------------- शृण्वद्भ्याम् ----------------

33. ---------------- ------------ यापयत्सु

**आ) आवरणे लिखितानां धातूनाम् उचितैः शतृ/शानजन्तरूपैः रिक्तस्थानानि पूरयत।** **(6X1=6)**

34. सम्यक् कार्यम् ------------------- यन्त्रं तन्त्रज्ञः समीकरोति। ( अ+कृ)

35. --------------- मुखेन सुजाता अग्रजम् आह्वयति। ( वि-कस्)

36. ------------- वीक्षकान् अनुसृत्य चलच्चित्राणि निर्मान्ति। (दृश्)

37. ----------------- लिपिकाराय उत्कोचः न दीयताम्। ( लिख्)

38 ----------------- पितुः एकाग्रता कोलाहलेन विच्छिन्ना। ( अधि-इ-शानच्)

39. उच्चैः -------------------- तस्मै किञ्चिज्जलं यच्छतु। ( भाष्)

**इ) "सत्सप्तमी" प्रयोगेण पञ्चवाक्यानि लिखत।** **(5X1=5)**

40. यदा माता गायन्ती आसीत् तदा पुत्री रोदनं स्थगितवती।

41. आगच्छन्त्यः गावः प्रदोषकालः प्रसृतः।

42. रामलक्ष्मणौ वदन्तौ सीता हसन्मुखेन शृणोति।

43. पठन्त्यः बालिकाः बालकाःखेलन्ति।

44. चीटिकाः स्वीक्रियमाणाः चलच्चित्रम् आरब्धम्।



45. स्वरेण विना गीतानि गीयमानानि श्रोतारः मन्दिरं त्यक्तवन्तः।

ई) समुचितपदेन योजयत। (8X1/2=4)

(उत्तरप्रदेशः, काश्मीरम्, गुजरात् , तमिलनाडु, पाकिस्थानम् (नूतनम्), बिहारः बेङ्गाल्, मध्यप्रदेशः)

46.उज्जयिनी -

47.काञ्ची -

48.गुणशिला -

49.तक्षशिला -

50.नलन्दा -

51.नवद्वीप -

52.वल्लभी -

53.सारनाथ -

5. अ) अधो दत्तेषु पञ्चपदानि विभज्य सन्धिनाम लिखत। (5X1=5)

54. नटच्छङ्करः 55. युञ्जन्नेवम् 56 धनञ्जयः

57. दुःखं त्यज 58. बृहच्छत्रम् 59. सुबन्तम्

आ) अधो दत्तेषु पञ्चपदानि योजयित्वा सन्धिनाम लिखत। (5X1=5)

60. सम्राट्+ नयति 61. जगद् + हिताय 62. सं+ लापः

63. तत् + शृणु 64. प्रयत्नात् + यतमानः 65. अनुष्टुब् + छन्दः

इ) संयोज्यकेननियमेनविसर्गसन्धिःअभवत्इतिलिखत। (4X1=4)

66. तयोः+ तु 67. सः+ सन्न्यासी 68. बन्धुः + आत्मा 69. युञ्जतः + योगम्

6. अ) गणे अनर्हं पदं पृथक्कुरुत। (4 X ½= 2)

| | | | | |
|---|---|---|---|---|
| 70. | वररुचिः | पाणिनिः | वाल्मीकिः | पतञ्जलिः |
| 71. | पिङ्गलः | बोधायनः | कणादः | आर्यभट्टः |
| 72. | भोगः | दानम् | नाशः | विद्या |
| 73. | कौमारी | दुर्गा | वैष्णवी | ब्राह्मी |

आ) अधो दत्तेषु पञ्चपदानि प्रयुज्य स्वीयवाक्यानि लिखत। ( 5X1=5)

74. शयानाः 75. प्रार्थितः 76. अवतीर्य 77. आलोकितुम्

78. खादन्तीनाम् 79. पानीयम् 80. क्रीडत्सु

इ) अधो दत्तानि वाक्यानि संस्कृतेन अनुवदत। ( 5X1=5 )

81.ధ్యానంలో ఉన్న ముని పాముకు భయపడలేదు.

82. శ్రీకృష్ణుడు మాట్లాడుతూ ఉండగా నారదుడు వచ్చాడు.

83.బాధించే నడుంనొప్పి మాత్రతో తగ్గుతుంది.

84. శుభారంభాన్ని అదిరే కన్ను సూచిస్తుంది.

85. నా చేత పాఠం చెప్పబడుతున్నప్పుడు మౌనంగా వినాలి.

81. ध्यानमग्न ऋषि साँपसे भीत नहीं था।

82. जब भगवान कृष्ण बोल रहे थे, तब ही नारद जी आ गये।

83. पीठ दर्दएक गोली से शान्त होता है।

84. धडकता हुए नेत्र अच्छी शुरुआत का प्रतीक है।

85. मुझ से पाठ पढाने के समय तुम्हें चुपचाप सुनना चाहिए।

**81. The meditating sage was not afraid of the snake.**

**82. When Lord Krishna was speaking, Narada ji arrived.**

**83. Back pain will be relieved with a pill.**

**84. A throbbing eye is a symbol of a good beginning.**

**85. When the lesson was being taught by me, you should listen quietly.**

**ई) अधो दत्तानि वाक्यानि स्वभाषया अनुवदत।** **(5X1=5)**

86. याचमानेभ्यः भिक्षुकेभ्यः प्रायः सर्वे कुप्यन्ति।

87. केवलं बहुभाषमाणात् शासकीयनेतुः को वा लाभः?

88. सर्वेषु शयानेषु चोराः गृहं प्रविष्टवन्तः।

89. सर्वैः भोजने क्रियमाणे गृहस्थः ताम्बूलम् आनीतवान्।

90.गुरौ आहूतवति छात्राः आगतवन्तः।

**उ) अधोलिखितं गद्यभागं पठित्वा ततःदत्तानां प्रश्नानाम् उत्तराणि लिखत।** **(5X1=5)**

सैनिकः निर्भयःसीमाभूमौ स्थित्वा देशरक्षणं करोति। सः शत्रुभिःसह पराक्रमेण युध्यति । भारतसैनिकाः जगति शौर्ये, विक्रान्ततायां च सुविख्याताः सन्ति। अनुशासनस्य, सदाचारस्य च भारतसैनिकाः निरुपमानोदाहरणानि सन्ति। इमे महता प्रयासेन शरीरं शोषयित्वा, तापयित्वा च युद्धविद्याः शिक्षन्ते। ते नदीकूल-पर्वतशिखर-मरुभूमि-समुद्रतटादि-नानाविधप्रान्तेषु पत्नीपुत्रगृहादिकं त्यक्त्वा एकाकिनः तिष्ठन्ति। जलोपप्लव-भूकम्प-जातिकलहादिषु उपद्रवेषु सत्सु प्रशासनेन तेषां साहाय्यं स्वीक्रियते। स्वक्लेशमविगणय्य ते सेवां कुर्वन्ति। युद्धं कुर्वन्तस्ते प्राणैः वियुक्ता अपि वीरस्वर्गः प्राप्तः इति तुष्यन्ति। गृहाद्वियुक्ताः दूरे शिबिरेषु तिष्ठन्ति। कुटुम्बसुखात् ते सदा विप्रकृष्टाः सर्वकालं देशहितस्य चिन्तकाः सन्तः आदिनं चतुर्विंशतिहोरामितकालमपि कार्यशीलाश्च भवन्ति। इष्टमिष्टभिन्नमिति तेषां द्वन्द्वं नास्ति। यदधिकारिभिरुच्यते, तत् अविचलितम् आचरन्ति। युद्धे सति, विपत्तिकाले चागते ते विवेकं, शौर्यं, पराक्रमञ्च दर्शयन्तः शत्रून् घ्नन्ति। प्रतिकूलस्थितौ आपन्नायां निःसङ्कोचं स्वप्राणानपि त्यजन्ति।तानहं नमामि महत्या श्रद्धया युक्ता॥

**91. कीदृक्षु प्रदेशेषु सैनिकाः तिष्ठन्ति?92. सैनिकाः कदा कदा कार्यशीलाः भवन्ति?**

**93.सैनिकाः कथं शत्रून् घ्नन्ति?**

**94. कीदृशेषु परिस्थितिषु सैनिकाः प्राणानपि त्यजन्ति?**

**95. केषां भारतसैनिकाः उदाहरणानि भवन्ति?**



***